प्रमाणत्वाप्रमाणत्वादौ तयोः कस्य स्वतोग्राह्यता कस्य वा परतो ग्राह्यता तदेतन्मतभेदेन सर्वदर्शनसंग्रहे दर्शितम् "प्रमाणत्वाप्रमाणत्वे स्वतः साङ्ख्याः समाश्रिताः। नैयायिकास्ते परतः, सौगताश्चरमं स्वतः। प्रथमं परतः प्राहुः प्रामाण्यं, वेदवादिनः। प्रमाणत्वं स्वतः प्राहुः, परतश्चाप्रमाणताम्" इति। "वादिविवाददर्शनात् कथङ्कारं वेदानां धर्मे स्वतःप्रामाण्यमिति सिद्धवत्कृत्य स्वीक्रियते। किञ्च किमिदं स्वतः प्रामाण्यं नाम? किं स्वत एव प्रामाण्यस्य जन्म? आहोस्वित् स्वाश्रयज्ञानजन्यत्वम्? किमुत स्वाश्रयज्ञानसामग्रीजन्यत्वम्? उताहो ज्ञानसामग्रीजन्यज्ञानविशेषाश्रितत्वम्? किं वा ज्ञानसामग्रीमात्रजन्यज्ञानविशेषाश्रितत्वम्? तत्राद्यः सावद्यः-कार्य्यकारणभावस्य भेदसमानाधिकरणत्वेनैकस्मिन्नसम्भवात्, नापि द्वितीयः गुणस्य सतो ज्ञानस्य प्रामाण्यं प्रति समवायिकारणतया द्रव्यत्वापातात्। नापि तृतीयः प्रामाण्यस्योपाधित्वे जातित्वे वा जन्मायोगात्, स्मृतित्वानधिकरणस्य ज्ञानस्य बाधात्यन्ताभावः प्रामाण्योपाधिः न च तस्योत्पत्तिसम्भवः अत्यन्ताभावस्य नित्यत्वाभ्युपगमादत एव न जातेरपि जनिर्युज्यते। नापि चतुर्थः ज्ञानविशेषो ह्यप्रमा विशेषसामग्र्याञ्च सामान्यसामग्री अनुप्रविशति शिंशपासामग्र्यामिव वृक्षसामग्री, अन्यथा तस्याकस्मिकत्वं प्रसजेत् तस्मात् परतस्त्वेन स्वीकृतं प्रामाण्यं विज्ञानसामग्रीजन्याश्रितमित्यतिव्याप्तिरापद्येत। पञ्चमविकल्पं विकल्पयामः किं दोषाभावसहकृतज्ञानसामग्रीजन्यत्वमेव ज्ञानसामग्रीमात्रजन्यत्वं, किं दोषाभावासहकृतज्ञानसामग्रीजन्यत्वं, नाद्यः दोषाभावसहकृतज्ञानसामग्रीजन्यत्वमेव परतः प्रामाण्यमिति परतः प्रामाण्यवादिभिरङ्गीकरणात् नापि द्वितीयः, दोषाभावसहकृतत्वेन सामग्र्यां सहकृतत्वे सिद्धे अनन्यथासिद्धान्वयव्यतिरेकसिद्धतया दोषाभावस्य कारणताया वज्रलेपायमानत्वात्। अभावः कारणमेव न भवतीति चेत् तदा वक्तव्यम् अभावत्वे कार्य्यत्वमस्ति न वा यदि नास्ति तदा घटप्रध्वंसानुपपत्त्या नित्यताप्रसङ्गः। अथास्ति किमपराद्धं कारणत्वेनेति सेयमुभयतःपाशा रज्जुः। तदुदितमुदयनेन "भावो यथा तथाऽभावः कारणं कार्य्यवन्मतम्" इति। तथाच प्रयोगः विमता प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्य्यत्वे सति तद्विशेषत्वात् अप्रमावत् प्रामाण्यं च परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत्। तस्मादुत्पत्तौ ज्ञप्तौ च परतस्त्वे प्रमाणसम्भवात् स्वतः सिद्धं प्रामाण्यमित्येतत् पूतिकूष्माण्डायत इति चेत् तदेतदाकाशमुष्टिहननायते। विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमायाः स्वतस्त्वमिति निरुक्तिसम्भवात् अस्ति चात्रानुमानं विमता प्रमा विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तजन्या न भवति अप्रमात्वानधिकरणत्वात् घटादिवत् न चौदयनमनुमानं परतस्त्वसाधकमिति शङ्कनीयं प्रमा दोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्या न भवति ज्ञानत्वादप्रमावदिति प्रतिसाधनग्रहग्रस्तत्वात् ज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसम्भवे तदतिरिक्तस्य गुणस्य दोषाभावस्य वा कारणत्वकल्पनायां कल्पनागौरवप्रसङ्गाच्च। ननु दोषस्याप्रमाहेतुत्वेन तदभावस्य प्रमां प्रति हेतुत्वं दुर्निवारमिति चेत् न दोषाभावस्याप्रमाप्रतिबन्धकत्वेनान्यथासिद्धत्वात्। "तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः। अप्रमाण्यद्वयासत्त्वं तेनोत्सर्गो नयोदितः" इति। तथा प्रमाज्ञप्तिरपि ज्ञानज्ञापकसामग्रीत एव जायते। न च संशयानुदयप्रसङ्गो बाधक इति युक्तं वक्तुं सत्यपि प्रतिभासपुष्कलकारणे प्रतिबन्धकदोषादिसमवधानात् तदुपपत्तेः। किञ्च तावकमनुमानं स्वतः प्रमाणं न वा आद्ये अनैकान्तिकता द्वितीये तस्यापि परतः प्रामाण्यमेवं तस्य तस्यापीत्यनवस्था दुरवस्था स्यात्। यदत्र कुसुमाञ्जलावुदयनेन झटिति प्रचुरप्रवृत्तेः प्रामाण्यनिश्चयाधीनत्वाभावमापादयता प्रण्यगादि प्रवृत्तिर्हीच्छामपेक्षते तत्प्राचुर्य्ये चेच्छाप्राचुर्य्यम् इच्छा चेष्टसाधनताज्ञानं तच्चेष्टजातीयत्वलिङ्गानुभवं सोऽपीन्द्रियार्थसन्निकर्षं प्रामाण्यग्रहस्तु न क्वचिदुपयुज्यत इति तदपि तस्करस्य पुरस्तात् कक्षे सुवर्णमुपेत्य सर्वाङ्गोद्घाटनमिव प्रतिभाति। अतः समीहितसाधनज्ञानमेव प्रमाणतयावगम्यमानमिच्छां जनयतीत्यत्रैव स्फुट एव प्रामाण्यग्रहणस्योपयोगः। किञ्च क्वचिदपि चेद्विचिकित्सा प्रवृत्तिः संशयादुपपद्येत तर्हि सर्वत्र तथाभावसम्भवात् प्रामाण्यनिश्चयो निरर्थकः स्यात्। अनिश्चितस्य सत्त्वमेव दुर्लभमिति प्रामाण्यं दत्तजलाञ्जलिकं भवेत्"।

**परत्र** अव्य० परस्मिन् काले पर+त्रल्। परकाले स्वर्गादिलोके।

**परत्रभीरु** त्रि० परलोकभीरौ धार्म्मिके कात्या० स्मृतिः।

**परत्व** न० परस्य भावः। वैशेषिकोक्ते द्रव्याश्रिते गुणभेदे तच्च द्विविधं दैशिकं कालिकञ्च तदेतत् कणादसूत्रोप-